Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:2(4), February 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

# आट्टक्कथासाहित्ये वीरकेरलवर्मणः योगदानम्

# VEERAKERALAVARMAN'S CONTRIBUTION TO ATTAKKATHA LITERATURE

**Vindhya VP**
HST Sanskrit, GHSS Punoor, Kozhikode

प्राचीनकालेषु कथाकेलिः इत्यस्य दृश्यकलारूपस्य संरक्षकाः प्रचारकाः च प्रधानतया अत्रत्याः अधिपाः प्रभवश्च आसन्। अस्याः कलायाः उन्नमनार्थं प्रचरणार्थं च नैकविधानि योगधानानि अत्र पूर्वमासन्। एवमेव गोश्रीराजवंशस्य अधिपाः कलातत्पराः कलाप्रोत्साहकाश्च आसन्। राजकुटुम्बेऽस्मिन् कलापरिपोषकेषु अन्यतमः आसीत् वीरकेरलवर्मा। अयं तु गोश्रीराजानां मध्ये अष्टाविंशतितमराजो आसीत्। राजकुटुम्बेऽस्मिन् वैष्णवाराधना सम्प्रदायमेव आसीत्।अतः एव वैष्णवभक्तोयम्।मध्वमतानुयायी अपि आसीत् एषः।अतः अस्य आट्टक्कथासु मध्वमत स्वाधीनं द्रष्टुं शक्यते।

**वीरकेरलवर्मणः जीवनकालम् ।**

कलाप्रवर्तकानांप्रोत्साहने नितरां दत्ताश्रयः आसीत् वीरकेरलवर्मा।मध्वभक्तोयम् आट्टक्कथारचनायाम् अतीव तत्परः आसीत्। तेन नैकविधाः आट्टक्कथाः विरचिताः। अयं गोश्रीराजवंशस्य अधिपस्य रामवर्ममहाराजस्य कनिष्ठसहोदरः आसीत्। गोश्रीराज्ञानां मध्ये कलारूपाणां साहित्यकाराणां च प्रोत्साहकेषु प्रधानः आसीत् वीरकेरलवर्मा। आरूर् अटितिरि,कल्लूर् नम्पूतिरिप्पाट्,मुतुकुरुशि उण्णि, इटवट्टिक्काट् अनुजन् नम्पूतिरि,आम्बल्लूर् इलयिटत्तु नारायणन् नम्पूतिरिप्पाट्,चेरनल्लूर् कृष्णन् कर्ता इत्येते साहित्यकाराः वीरकेरलवर्मणःआश्रिताः आसन्।राज्यभारं मन्त्रिप्रवरेषु निक्षिप्यवीरकेरलवर्म मध्वमतग्रन्थपारायणं तथा विद्वत्कविभिः साकं संभाषणं काव्यरचनां च विधाय कालं न्यापितवान्।

**वीरकेरलवर्मणः मध्वविचारः**

वीरकेरलवर्मा मध्वमतानुयायी आसीत्।एषः मध्वाचार्ययोः वादिराजविश्वेश्वरतीर्थपादयोः शिष्यः आसीत्। तयोः सकाशात् मध्वभाष्यं पठित्वा तस्मिन् वैदुष्यं च प्राप्तवानासीत् अयम्। तस्य मध्वभक्तिः तदीयरचनासु भूरि प्रकाशिता दृश्यते। तथा मध्वविजयमिति एका आट्टकथापि तेन विरचितः। अपि च तस्य कृतिषु मध्वमतप्रचरणार्थं कृताः नैकविधाः कृतयः वर्तन्ते।आट्टक्कथां विहाय मध्वविचारप्रतिपातकौ द्वौ ग्रन्थौ अपि तेन विरचितौ। व्युत्पत्तिबले मध्वमतभक्तौ च रामवर्ममहाराजम् अतिशेते स्म। एवं मध्वमते अतीवतत्परः सः मध्वमतप्रचाराय यथाशक्तिः परिश्रमं चकार।

**वीरकेरलवर्मणः कृतयः**

वीरकेरलवर्मा प्रतिदिनं कथामेकां रचयति स्म। तेन विरचिताः अष्टचत्वारिंशत् आट्टक्कथाःअद्यापिलभन्ते। ताश्च कल्याणसौगन्धिकम्, ध्रुवचरितम्,गजेन्द्रमोक्षम्, सन्तानगोपालम्, रावणपराजयम्, जरासन्धपराजयम्, नीलास्वयंवरम्, सुदक्षिणवधम्, रुक्मिणीस्वयंवरम्, पारिजातहरणम्, मित्रविन्धास्वयंवरम्, रेवतीस्वयंवरम्,भद्रादेवीस्वयंवरम्, कालीस्वयंवरम्, लक्षणास्वयंवरम्, रुक्मिवधम्,दुश्शासनवधम्, दूतवाक्यम्,

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:2(4), February 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

सुन्दोपसुन्दोपाख्यानम्, किर्मीरवधम्, भीमसेनद्विग्विजम्, श्रीकृष्णावतारम्, अष्टाक्षरमहात्म्यम्, साल्ववधम्, रासक्रीडा, सीतास्वयंवरम्, सुग्रीवाभिषेकम्, सगरोपाख्यानम्, निवातकवचवधम्, अजामिलमोक्षम्, भार्गवचरितम्, माध्वविजयम्, बलरामतीर्थयात्रा, वामनमहात्म्यम्, ताटकावधम्,शाकुन्तलम्, दक्षयागम्,किरातम्, सुन्दरीस्वयंवरम्, अम्बरीषचरितम्, व्यासावतारम्, यागरक्षा, अहल्यामोक्षम्, मुचुकुन्दमोक्षम्, पाञ्चालीस्वयंवरम्, देवयानीचरितम्, अमृतमथनम्, सुभद्राहरणम् इत्येताः भवन्ति।

**वीरकेरलवर्मणः रचनाशैली**

कथाकेल्यां वीरकेरलवर्मणः सीमातिवर्ति अभिरुचिरवर्तता। सः प्रत्यहं नव्याम् आट्टक्कथां विरच्य अभिनेति स्म। तदर्थं कश्चित् संघयेव तेन रूपीकृता आसीत्।उपशताः आट्टक्कथाः तेन विरचिताः।तस्य आट्टक्कथा पद्यानि प्रायेण अधीव सुन्दराणि भवन्ति।गीतेषु अधिकान्यपि संस्कृतभाषायाः आधिक्यं दरीदृश्यते।तत्र तत्र भाषापदान्यपि तेषु दृश्यन्ते। तथा भाषापदरचितेषु गीतेषु संस्कृतमपि द्रष्टुं शक्यते।बहूनामपि गीतानां भाषा मिश्र अतिमिश्रो भवति इति वक्तुं शक्यते।

यथा –

रमामुखरे निङल् शृणुत वृमहितरुपवनमितुमेहि[1]
वनमिदमतिरुचिरं घनमञ्जुद्रुमलसितम्
वनजकुसुमोल्पलादि सुमनोयुत सरसीयुतं
हेमप्रकण्डमायी निबिरीसनीलपात्रौ-
घालंबिधवल सुमशालिसत्तरुक्कलित
वैदूर्यवेदिकङल् विडौजोद्रुमसमङल्
मङगल्यकर्मकृत मण्डपा इव भान्ति
अत्रैव तल्कमलपत्रेक्षणयाय
रुक्मिणी विवाहकृते चेम्मे इति मतिम्मा।।

इत्येतानि पद्यानि रुक्मिणीस्वयंवरात् उद्धृतानि भवन्ति।अस्मिन् आट्टक्कथायाम् कैरलीभाषाप्रयोगम् अधिकतया द्रष्टुं शक्यते। कोट्टारक्करराजस्य रामनाट्टस्य भाषाशैली एव वीरकेरलवर्मणः प्रबन्धेषु दृश्यन्ते।तेषु पूर्णरूपेण संस्कृतभाषामाश्रित्य विरचिताः प्रबन्धाः अपि सन्ति।

**वीरकेरलवर्मणः कृतिविचारः**

अस्य आट्टक्कथासु भूयांसो अपि आट्टक्कथाः इतिहासकाव्येतिवृत्तम् उपजीव्य विरचिताः। वीरकेरलवर्मणा रचितासु आट्टक्कथासु कतिचन वैशिष्ट्यानि द्रष्टुं शक्यते।तदीय मध्वमतभक्तिः मुख्यतया द्रष्टुं शक्यते।कथानायकानां ,सल्पात्राणां,मुनीनां च मध्वमतभक्तत्वेन परिकल्पनं पूर्णत्रयीशस्य संगमग्रामस्य च

[1]उल्लूर् एस् परमेश्वरय्यर्, केरलसाहित्य चरित्रम्,पु.477

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:2(4), February 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

स्मरणं,पदानां पादकल्पनं,श्रीपद्मनाभस्य स्मृतिः स्थानं च एतासु सविशेषतया प्रतिपादिताः वर्तन्ते। कथापात्रं देवो राजा- मन्त्री वा भवतु ते मध्वभक्ताः स्युः इत्यत्र तस्य निर्बन्धबुद्धिरासीत्। मध्वमतभोक्ता एव योग्यता सम्पूर्ण इत्येव तदीय मतम्।तदीय कथायाः खलपात्राणि तु मध्वमत द्वेषिणी एव। यथा-

देवाभो ह्यमेधमुख्यमकृच्छ्रीमध्वशास्राश्रितो[2]
देवद्रुस्सुजनार्थिनां पुरहरेन्द्रानंदेवोपमः॥
कतिचन पद्यानि कवेरस्य विनयभावं नितरां प्रकाशयन्ति। यथा-
लोकेषु विख्यात उदारकृत्यः[3]
श्रीकान्तसेवोत्सुकमानसस्सदा।
सनर्मदातीरलसन्निजाश्रमे
मुनिप्रवीरस्सुखमास्तमाध्वः॥
कविरत्र मध्वमतमेव श्रेष्ठमिति सयुक्तिकं प्रमाणीकरोति।तदीयं पद्यं यथा-
श्रीलक्ष्मीशपदाब्जभक्तजनतामौलिः सुरादीश्वर-[4]
श्रीमदवज्रधरादिवन्तितपदं रुद्रांश भूतात्रिजम्।
श्रीमद्वायुविनिर्मितोत्तममहाशास्रज्ञमुख्यं यति-
प्रौढं तुंगसुवर्णवर्णसुजटाभारोल्लसच्छीर्षकः॥
रसाविष्कारे अस्य कृतयः इतरकवीनां कृतिषु सुतराम् अतिशशेते।यथा-
नृत्यल्भ्रूचक्रमित्थं प्रकटतररूषाविष्टसुग्रीवरावं[5]
श्रुत्वावृत्रारिपुत्रो झटिति निजपुरान्निर्गतः क्रोधदीप्तः।
उत्तप्तस्वर्णवर्णप्रकटितकुटिलस्यीयदंष्ट्रोग्रवक्त्रो
मार्ताण्डिं तं बभाषे प्रलयघनघटाघोरधृष्टाट्टहासः॥
वीरकेरलवर्मणः पदनिर्मितिवैभवम् उल्लूर्महाशयेन स्व ग्रन्थे इत्थं परामर्श्यते। यथा-
वीरसेनस्य नन्दनः सुरर्षि पितृनन्दनः[6]
शौरीभक्तजनानन्दनः क्रूरमायी दैत्यनिन्दनः।
यदुवंशवाधिर्चन्द्रः मददूरस्सद् गुणसान्द्रः
धैर्यजितहिमागेन्द्रः सवविद्भूमिमहेन्द्रः॥

पूर्णत्रयीशशतकं,दशावतारमाला इति संस्कृतकृतिद्वयमपि तेन विरचितं वर्तते।अनयोः पूर्णत्रयीशशतकं लघुस्तोत्रकाव्यं भवति। यस्यां 102 पद्यानि अन्तर्भवन्ति। काव्येऽस्मिन् महाविष्णोः माहात्म्यमेव प्रतिपाद्य विषयः।

---

[2]तत्रैव,पु.347
[3]वटक्कुङ्कूर् राजराजवर्म, केरलीयसंस्कृतसाहित्य चरित्रम् पु.348
[4]तत्रैव
[5]तत्रैव ,पु.351
[6]उल्लूर् एस् परमेश्वरय्यर्, पु .479

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:2(4), February 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

पूर्णत्रयीशशतकं स्व गुरोः वादिराजस्वामिनः प्रीत्यर्थमेव तेन व्यरचि। अस्यां कृतौ बहुत्र मध्वमतस्य प्रशंसा इतरमत आक्षेपश्च दृश्यते। काव्येऽस्मिन् मध्वमतप्रकीर्तनश्लोकं यथा-

लक्ष्मीकान्ता तवापि मध्वपवन श्रीवादिराजाख्ययो-[7]

रस्मद्देशिकवर्यायोश्च परमप्रीत्यर्थमेतल् कृतं

बालेनापि मया यदत्र हि विरुद्धं स्यान्मदज्ञानतः

श्रीमन्मध्वसुशास्त्रतस्तदखिलं क्षान्त्वा प्रसीदप्रभो

**उपसंहारम्**

कथाकेल्याः प्रोत्साहने आट्टक्कथाप्रणयने कवीनां प्रचोदने च प्रातःस्मरणीयो भवति गोश्री वीरकेरलवर्मा। स तु मध्वमतावलम्बी आसीत्।स्वीयरचनाः सः मध्वमतप्रचारणायपि उपयुक्तः। मध्वमतप्रकीर्तनं तस्य रचनासु आधिक्येन दृश्यते।द्रुतकवनेन साविर्भूतानीत्यतः तस्य रचनाः न्यूनसाहित्यगुणाः इति वक्तुं शक्याः।

## BIBLIOGRAPHY

**ENGLISH BOOKS**

- Raja K.Kunjunni, The Contribution of kerala Sanskrit Literature, University of Madras,1980.

**MALAYALAM BOOKS**

- ParameswarayyerUllur S, Keralasāhityacaritram, (Vol.3),University of kerala,Thiruvanthapuram,1990.
- Krishnakaimal,Aymanam,Āṭṭakathāsāhityam,Kerala Bhasha Institute, Thiruvanathapuram,1998.
- Raja, Raja,Varma, Vatakkumkur, KeraliyasaṃskṛtaSāhityaCaritram,(Vol.iv), SreeSankaracharya University of Sanskrit, Kalady, 1997.

**JOURNALS**

- Narayanapisharody M A,Thraimasikam,Samastha Kerala Sahitya Parishat,1113

[7] वटक्कुंकूर् राजराजवर्म, पु.353

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:2(4), February 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

## UNPUBLISHED DISSERTATION


- Dhanasurjith, D. Tenets of Madhva Philosophy In Pūrnatrayiśaśataka of Virakeralavarma, Sree Sankaracarya Sanskrit University, Kerala,2009.